श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ षण्णवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षण्णवतितमः सर्गः ॥

## त्रस्तानां वन्यमृगाणां पलायनहेतुमभिज्ञातुं श्रीरामस्य सौमित्रिं प्रत्यादेशः, लक्ष्मणेन शालवृक्षमारुह्य भरतसैन्यनिरीक्षणं तं प्रति स्वरोषपूर्णोद्गारस्य प्रकटनम्

तां तदा दर्शयित्वा तु मैथिलीं गिरिनिम्नगाम्।
निषसाद गिरिप्रस्थे सीतां मांसेन छन्दयन्॥ **2.96.1** ॥

इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना।
एवमास्ते स धर्मात्मा सीतया सह राघवः॥ **2.96.2** ॥

तथा तत्रासतस्तस्य भरतस्योपयायिनः।
सैन्यरेणुश्च शब्दश्च प्रादुरास्तां नभस्पृशौ॥ **2.96.3** ॥

एतस्मिन्नन्तरे त्रस्ताः शब्देन महता ततः।
अर्दिता यूथपा मत्ताः सयूथाद् दुद्रुवुर्दिशः॥ **2.96.4** ॥

स तं सैन्यसमुद्धूतं शब्दं शुश्राव राघवः।
तांश्च विप्रद्रुतान् सर्वान् यूथपानन्ववैक्षत॥ **2.96.5** ॥

तांश्च विप्रद्रुतान् दृष्ट्वा तं च श्रुत्वा महास्वनम्।
उवाच रामः सौमित्रिं लक्ष्मणं दीप्ततेजसम्॥ **2.96.6** ॥

हन्त लक्ष्मण पश्येह सुमित्रा सुप्रजास्त्वया।
भीमस्तनितगम्भीरं तुमुलः श्रूयते स्वनः॥ **2.96.7** ॥

गजयूथानि वारण्ये महिषा वा महावने।
वित्रासिता मृगाः सिंहैः सहसा प्रद्रुता दिशः॥ **2.96.8** ॥

राजा वा राजपुत्रो वा मृगयामटते वने।
अन्यद्वा श्वापदं किञ्चित् सौमित्रे ज्ञातुमर्हसि॥ **2.96.9** ॥

सुदुश्चरो गिरिश्चायं पक्षिणामपि लक्ष्मण।
सर्वमेतद् यथातत्त्वमभिज्ञातुमिहार्हसि॥ **2.96.10** ॥

स लक्ष्मणः सन्त्वरितः सालमारुह्य पुष्पितम्।
प्रेक्षमाणो दिशः सर्वाः पूर्वां दिशमवैक्षत॥ **2.96.11** ॥

उदङ्मुखः प्रेक्षमाणो ददर्श महतीं चमूम्।
गजाश्वरथसम्बाधां यत्तैर्युक्तां पदातिभिः॥ **2.96.12** ॥

तामश्वरथसम्पूर्णां रथध्वजविभूषिताम्।
शशंस सेनां रामाय वचनं चेदमब्रवीत्॥ **2.96.13** ॥

अग्निं संशमयत्वार्यः सीता च भजतां गुहाम्।
सज्यं कुरुष्व चापं च शरांश्च कवचं तथा॥ **2.96.14** ॥

तं रामः पुरुषव्याघ्रो लक्ष्मणं प्रत्युवाच ह।
अङ्गावेक्षस्व सौमित्रे कस्येमां मन्यसे चमूम्॥ **2.96.15** ॥

एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत्।
दिधक्षन्निव तां सेनां रुषितः पावको यथा॥ **2.96.16** ॥

सम्पन्नं राज्यमिच्छंस्तु व्यक्तं प्राप्याभिषेचनम्।
आवां हन्तुं समभ्येति कैकेय्या भरतः सुतः॥ **2.96.17** ॥

एष वै सुमहाञ्छ्रीमान् विटपी सम्प्रकाशते।
विराजत्युज्ज्वलस्कन्धः कोविदारध्वजो रथे॥ **2.96.18** ॥

भजन्त्येते यथाकाममश्वानारुह्य शीघ्रगान्।
एते भ्राजन्ति संहृष्टा गजानारुह्य सादिनः॥ **2.96.19** ॥

गृहीतधनुषावावां गिरिं वीर श्रयावहे।
अथवेहैव तिष्ठावः सन्नद्धावुद्यतायुधौ॥ **2.96.20** ॥

अपि नौ वशमागच्छेत् कोविदारध्वजो रणे।
अपि द्रक्ष्यामि भरतं यत्कृते व्यसनं महत्॥ **2.96.21** ॥

त्वया राघव सम्प्राप्तं सीतया च मया तथा।
यन्निमित्तं भवान् राज्याच्च्युतो राघव शाश्वतात्॥ **2.96.22** ॥

सम्प्राप्तोऽयमरिर्वीर भरतो वध्य एव हि।
भरतस्य वधे दोषं नाहं पश्यामि राघव॥ **2.96.23** ॥

पूर्वापकारिणं हत्वा न ह्यधर्मेण युज्यते।
पूर्वापकारी भरतस्त्यागेऽधर्मश्च राघव॥ **2.96.24** ॥

एतस्मिन् निहते कृत्स्नामनुशाधि वसुन्धराम्।
अद्य पुत्रं हतं सङ्ख्ये कैकेयी राज्यकामुका॥ **2.96.25** ॥

मया पश्येत् सुदुःखार्ता हस्तिभिन्नमिव द्रुमम्।
कैकेयीं च वधिष्यामि सानुबन्धां सबान्धवाम्॥ **2.96.26** ॥

कलुषेणाद्य महता मेदिनी परिमुच्यताम्।
अद्येमं संयतं क्रोधमसत्कारं च मानद॥ **2.96.27** ॥

मोक्ष्यामि शत्रुसैन्येषु कक्षेष्विव हुताशनम्।
अद्यैव चित्रकूटस्य काननं निशितैः शरैः॥ **2.96.28** ॥

छिन्दञ्छत्रुशरीराणि करिष्ये शोणितोक्षितम्।
शरैर्निर्भिन्नहृदयान् कुञ्जरांस्तुरगांस्तथा॥ **2.96.29** ॥

**श्वापदाः परिकर्षन्तु नरांश्च निहतान् मया।**
**शराणां धनुषश्चाहमनृणोऽस्मिन् महावने।**
**ससैन्यं भरतं हत्वा भविष्यामि न संशयः॥ 2.96.30॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे षण्णवतितमः सर्गः॥